संस्कृतबालादर्शे पञ्चमः पाठः ५

| | |
|---|---|
| **अश्वः** | **रथः** |
| **अयम् अश्वः।** | **अयं रथः।** |
| **तृणम्।** | **सारथिः।** |
| **गृहम्।** | **कपिः।** |
| **जलम्।** | **नृपतिः।** |
| **अहम्।** | **त्वम्।** |

सारथिः रथं नयति। कपयः फलानि खादन्ति। हरिः गृहं गच्छति। अश्वाः तृणं चरन्ति। बालौ जलम् आनयतः। नृपतयः अश्वान् आरोहन्ति। अहं फलानि खादामि। त्वं वृक्षम् आरोहसि।

**प्रश्नाः।**

**क)** १। सारथिः किं करोति? सारथिः रथं नयति।

| | |
|---|---|
| २। कपयः कानि खादन्ति? | कपयः फलानि खादन्ति। |
| ३। कः गृहं गच्छति? | हरिः गृहं गच्छति। |
| ४। अहं कान् आरोहामि? | त्वं वृक्षान् आरोहसि। |
| ५। अश्वाः किं चरन्ति? | अश्वाः तृणं चरन्ति। |
| ६। बालौ किम् आनयतः? | बालौ जलम् आनयतः। |
| ७। के कान् आरोहन्ति? | नृपतयः अश्वान् आरोहन्ति। |
| ८। त्वं किं खादसि? | अहं फलानि खादामि। |

**ख)** लट् रूपैः वाक्यानि पूरयत।

| | |
|---|---|
| १। अश्वाः जनान् _ (वह्) । | अश्वाः जनान् **वहन्ति**। |
| २। नृपतयः प्रजाः ____ (रक्ष्)। | नृपतयः प्रजाः **रक्षन्ति**। |
| ३। वृषभौ तृणं ___ (चर्) । | वृषभौ तृणं **चरतः**। |

**ग)** इदम् शब्दस्य रूपैः वाक्यानि पूरयत्।

| | |
|---|---|
| १। ___ सारथिः रथं नयति। | **अयं** सारथिः रथं नयति। |
| २। __ कपयः फलानि खादन्ति। | **इमे** कपयः फलानि खादन्ति। |
| ३। **इमौ** अश्वौ रथं नयतः। | **इमौ** अश्वौ रथं नयतः। |
| ४। ___ बालिकाः गृहं गच्छन्ति। | **इमाः** बालिकाः गृहं गच्छन्ति। |

| | | | | | |
|---|---|---|---|---|---|
| **घ)** | अस्मद् शब्दः (I) | अहम् | आवाम् | वयम् | (प्रथमा) |
| | युष्मद् शब्दः (You) | त्वम् | युवाम् | यूयम् | (प्रथमा) |

**शब्द संग्रहः = Vocabulary**

रथः = *m* chariot, तृणम् = *n* grass, सारथिः = *m* charioteer, नृपतिः = *m* king, कपिः = *m* monkey, अहम् = (*all genders)* I, त्वम् = (*all genders*) you, नयति = *P.* leads, आनयति = *P.* brings, खादन्ति = *P.* they eat, चरन्ति = *P.* they graze, आरोहन्ति = *P.* they ascend